# Brahmakritam 13 Vishnu Stotram

# ब्रह्मकृतं १३ विष्णुस्तोत्रम्

## Document Information

Text title : Brahmakritam 13 Vishnu Stotram

File name : brahmakRRitaM13viShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 335/34-42||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

Brahmakritam 13 Vishnu Stotram

# ब्रह्मकृतं १३ विष्णुस्तोत्रम्

नमस्ते ब्रह्महृदय नमस्ते मम पूर्वज ।
लोकाद्य भुवनश्रेष्ठ साङ्ख्ययोगनिधे विभो ॥ ३४॥

व्यक्ताव्यक्तकराचिन्त्य क्षेमं पन्थानमास्थित ।
विश्वभुक्सर्वभूतानामन्तरात्मन्नयोनिज ॥ ३५॥

अहं प्रसादजस्तुभ्यं लोकधाम्ने स्वयम्भुवे ।
त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम् ॥ ३६॥

चाक्षुषं वै द्वितीयं मे जन्म चासीत्पुरातनम् ।
त्वत्प्रसादाच्च मे जन्म तृतीयं वाचिकं महत् ॥ ३७॥

त्वत्तः श्रवणजं चापि चतुर्थं जन्म मे विभो ।
नासिक्यं चापि मे जन्म त्वत्तः पञ्चममुच्यते ॥ ३८॥

अण्डजं चापि मे जन्म त्वत्तः षष्ठं विनिर्मितम् ।
इदं च सप्तमं जन्म पद्मजं मेऽमितप्रभ ॥ ३९॥

सर्गे सर्गे ह्यहं पुत्रस्तव त्रिगुणवर्जितः ।
प्रथितः पुण्डरीकाक्ष प्रधानगुणकल्पितः ॥ ४०॥

त्वमीश्वरस्वभावश्च स्वयम्भूः पुरुषोत्तमः ।
त्वया विनिर्मितोऽहं वै वेदचक्षुर्वयोतिगः ॥ ४१॥

ते मे वेदा हृताश्चक्षुरन्धो जातोऽस्मि जागृहि ।
ददस्व चक्षुषी मह्यं प्रियोऽहं ते प्रियोऽसि मे ॥ ४२॥

इति महाभारते शान्तिपर्वणि ३३५ अध्यायान्तर्गतं
ब्रह्मकृतं विष्णुस्तोत्रं सम्पूर्णम् ।

महाभारत । शान्तिपर्व । अध्याय ३३५/३४-४२॥

mahAbhArata . shAntiparva . adhyAya 335/34-42..

Proofread by PSA Easwaran

*Brahmakritam 13 Vishnu Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*